छायम् २ } छायम् २, } चिच्छासम् २, } चाच्छायम् २ ; }
छात्वा २, छित्वा २, } छाययित्वा २, } चिच्छासित्वा २, } चाच्छायित्वा २ ; }
[1]छाया, [2]छागः.

(578) "जक्ष भक्षहसनयोः" (II-अदादिः-1071. सक. सेट्. पर.)

जक्षित्यादिः ।

जक्षकः-क्षिका, जक्षकः-क्षिका, जिजक्षिषकः-षिका, [3]जाजक्षकः-क्षिका ;
जक्षिता-त्री, जक्षयिता-त्री, जिजक्षिषिता-त्री, जाजक्षिता-त्री ;
[4]जक्षत्[A]-ती, [5]जक्षन्ति-जक्षति[कुलानि], [6]जक्षयन्-न्ती, जिजक्षिषन्-न्ती ;—
जक्षिष्यन्-न्ती-ती, जक्षयिष्यन्-न्ती-ती, जिजक्षिषिष्यन्-न्ती-ती ;—
— — — जाजक्ष्यमाणः, जाजक्षिष्यमाणः ;
[7]जट्-जड्-जक्षौ-जक्षः ; — — —
[8]जक्षितम्-तः, जक्षितः, जिजक्षिषितः, जाजक्षितः-तवान् ;
जक्षः, जक्षः, जिजक्षिषुः, जाजक्षः ;
जक्षितव्यम् , जक्षयितव्यम् , जिजक्षिषितव्यम् , जाजक्षितव्यम् ;

---

1. 'माच्छाससिसूभ्यो यः' [द. उ. 8-12] इति यप्रत्ययः। छयति, छायते वा इति छाया=प्रतिरूपम् ।
2. 'छापूञ्खडिभ्यो गक्' [द. उ. 3-69] इति गक्प्रत्ययः। छयति इति छागः=अजः ।
3. यङि द्वित्वे, अभ्यासस्य 'दीर्घोऽकितः' (7-4-83) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'जक्षित्यादयः षट्' (6-1-6) इत्यभ्यस्तसंज्ञायां, 'नाभ्यस्ताच्छतुः' (7-1-78) इति सर्वनामस्थाननिमित्तको नुम् न भवति ।
5. नपुंसकलिङ्गे शत्रन्तात् जश्शसोः 'वा नपुंसकस्य' (7-1-79) इति नुमागमो विकल्पेन भवति ।
6. निगरणचलनार्थेभ्यश्च' (1-3-87) इति ण्यन्तात् शतैव । न तु शानच् ।
7. 'क्विपि, पदान्ते, 'स्कोः संयोगाद्योरन्ते च' (8-2-29) इति ककारलोपे जश्त्वे चर्त्वे च रूपम् ।
8. 'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः—' (3-4-76) इति अधिकरणे, कर्मणि, कर्तरि च यथासम्भवं क्तप्रत्ययो भवति ।

A. 'उदश्वसन् प्राणमिवाप्य काश्चिद् दृष्ट्वा सलीलं मृदु जक्षतं तम् ॥' धा. का. 2. 51.